वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते ॥
यदंशांशा महालक्ष्मीः प्रिया नारायणस्य
च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
अथ महालक्ष्मीमन्त्रः ।
"तारो वाग्भवं माया रमाकामः हसौ-
र्जगत्प्रसूत्यै नमः ॥"
तथा च ।
"वाग्भवं शम्भुवनिता रमा मकरकेतनः ।
तार्त्तीयश्च जगत्पार्श्वो वह्निवीजसमुज्ज्वलः ॥
अर्घीशाढ्यो भृगुस्त्वेष्वन्तमन्त्रोऽयं द्वादशाक्षरः ।
महालक्ष्म्याः समुद्दिष्टस्ताराद्यः सर्व्वसिद्धिदः ॥"
तस्या ध्यानं यथा, तन्त्रसारे ।
"बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारो-
ज्ज्वलां
रत्नाकल्पविभूषितां कुचनतां शालैः करैर्म्मञ्ज-
रीम् ।
पद्मौ कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सस्मितां
फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत् परा-
म्बिकाम् ॥"
(अस्या वीजम् । ॐ ऐं ह्रीं श्रीं क्लीं हसौं
जगत्प्रसूत्यै नमः । )
महालिकटभी, स्त्री, ( महान्तः अलयः । तेषां
कटभी आश्रयभूतवृक्षः । ) श्वेतकिणिही-
वृक्षः । इति राजनिर्घण्टः ॥
महालिङ्गः, पुं, ( महान् पूज्यतमो विपुलो वा
लिङ्गोऽस्य ।) शिवः । इति महाभारते तस्य
सहस्रनामस्तोत्रम् । (यथा, राजतरङ्गिण्याम् ।
२ । १३७ ।
"अकरोत् स महाहर्म्म्यैर्महालिङ्गैर्महाह्वयैः ।
महात्रिशूलैर्म्महतीं महामाहेश्वरीं महीम् ॥"
महत् वृहल्लिङ्गमस्य ।) वृहल्लिङ्गयुक्तश्च ॥
महालीलसरस्वती, स्त्री, ( लीलया सरस्वती ।
महती लीलसरस्वतीति कर्म्मधारयः । ) तारा-
विशेषः ।
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती ।
तारास्वरूपिता चास्यां महालीलसरस्वती ॥"
इति तन्त्रसारः ॥
महालोध्रः, पुं, ( महान् लोध्रः । ) लोध्रविशेषः ।
इति रत्नमाला । पाटियालोध इति भाषा ॥
महालोलः, पुं, (महदतिशयं लोलं लौल्यमस्य ।)
काकः । इति राजनिर्घण्टः ॥ अतिचञ्चले, त्रि ॥
महालोहं, क्लौ, (महत् अतिशयगुणवत् लोहम् ।)
अयस्कान्तः । इति राजनिर्घण्टः ॥
महावनं, क्लौ, ( महत् विपुलं वनम् ।) वृहद्वनम् ।
तत्पर्य्यायः । अरण्यानी २ महारण्यम् ३ महा-
टवी ४ । इति राजनिर्घण्टः ॥(यथा, रामायणे ।
"निरस्ताः पथि धावन्ति त्रयस्ते यन्महावने ॥")
वृन्दावनस्थचतुरशीतिवनान्तर्गतवनविशेषश्च ॥
महावपः, पुं, ( महती वपा यस्य । यद्वा, महान्तं
धातुस्थौल्यादिकं वपतीति । वप + अच् । )
महामेदः । इति शब्दचन्द्रिका ॥

महावरा, स्त्री, ( व्रियते असौ देवादिभिरिति ।
वृ + अप् । टाप् । महती वरा । ) दूर्व्वा ।
इति शब्दरत्नावली ॥
महावराहः, पुं, ( महानीश्वरोऽपि सन् वराहः ।
महांश्चासौ वराहश्चेति वा । ) वराहरूपी
भगवान् । यथा,—
"महावराहो गोविन्दः सुषेणः कनकाङ्गदी ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
(राजविशेषः ।यथा, कथासरित्सागरे ।५२।८१।
"अस्ति शूरपुरं नाम यथार्थं नगरं भुवि ।
महावराह इत्यासीद्राजा तत्रातिदुर्म्मदः ॥")
महावरोहः, पुं, ( महान् अवरोहः शिफानां
अधोऽवतरणं यस्य । ) प्लक्षवृक्षः । इति राज-
निर्घण्टः ॥ ( विशेषोऽस्य प्लक्षशब्दे ज्ञातव्यः ॥)
महावल्ली, स्त्री, ( महती चासौ वल्ली चेति । )
माधवीलता । इति शब्दचन्द्रिका ॥ (उत्तमा
लता च । यथा, कथासरित्सागरे । ३३ । ८५ ।
"उपायरससंषिक्ता देशकालोपवृंहिता ।
सेयं नीतिमहावल्ली किं नाम न फलेत् फलम् ॥")
महावशः, पुं, ( महती वशा वपास्य । हस्वः । )
शिशुमारः । इति हेमचन्द्रः । ४ । ४१६ ॥
महावचाः, [स्] पुं, ( महत् वचः विराड्देहो
ऽस्य । ) शिवः । इति महाभारते तस्य सहस्र-
नामस्तोत्रम् । १३ । १७ । ८६ ॥ (महत् वचो-
ऽस्य । ) वृहदुक्तियुक्ते, त्रि ॥
महावाक्यं, क्लौ, ( महत् वाक्यम् । ) योग्यता-
काङ्क्षासत्तियुक्तवाक्यसमूहः । इति साहित्य-
दर्पणः । २ । २ ॥ न्यायमते तु । खघटकानेक-
नामलभ्यताहशार्थकम् । प्रकृत्यर्थमात्रावच्छिन्न-
प्रत्ययार्थबोधं प्रत्ययोग्यवाक्यं वा । इति शब्द-
शक्तिप्रकाशिका ॥ ( महत् महदर्थप्रकाशकं
वाक्यम् ।) तत्त्वमसीति आदिवाक्यम् । प्रतिष्ठा-
द्यनुसर्गवाक्यञ्च ॥
महावारुणी, स्त्री, ( वरुणो देवतास्याः । वरुण
+ अण् । ङीप् । महती वारुणी । ) गङ्गा-
स्नानस्य योगविशेषः । स तु शनिवारशतभिषा-
नक्षत्रयुक्तचैत्रकृष्णत्रयोदशीरूपः ।
यथा,—
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥
महाविद्या, स्त्री, ( विद्यते ज्ञायते इति । विद् +
क्यप् । टाप् । महती विद्या ज्ञानं तत्त्वसाक्षात्-
कारो वा यस्याः ।) देवीविशेषः । सा दशधा ।
यथा चामुण्डातन्त्रे ।
"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥
नात्र सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा ।

कालादिशोधनं नास्ति न चामित्रादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःखसाध्यं कथञ्चन ॥"
मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टाश्चाः सर्व्वा हि फलैः सह ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः ।
अथ चैता महाविद्याः कलिदोषान्न वाधिताः ॥"
इति तन्त्रसारः ॥ * ॥
तासां दशावतारत्वं यथा,—
"प्रकृतिर्विष्णुरूपा च पुरुषश्च महेश्वरः ।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश ॥
कृष्णरूपा कालिका स्यात् रामरूपा च
तारिणी ।
वगला कूर्म्ममूर्त्तिः स्यान्मीनो धूमावती भवेत् ॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी ।
सुन्दरी यामदग्न्यः स्याद्वामनो भुवनेश्वरी ॥
कमला बौद्धरूपा स्यात् दुर्गा स्यात् कल्कि-
रूपिणी ।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ।
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्व्रजे ॥"
इति मुण्डमालातन्त्रम् ॥
( गङ्गा । यथा, काशीखण्डे । २९ । १३६ ।
"महाविद्या महामाया महामेधा महौ-
षधम् ॥" )
महाविराट्,[ज्] पुं,(विशेषेण राजते प्रकाशते ।
इति । वि + राज् + क्विप् । महांश्चासौ विराट्
चेति ।) महाविष्णुः । यथा,—
मुनिरुवाच ।
"विश्वानां गोलोकं राजन् ! विस्तृतञ्च नभः-
समम् ।
शश्वन्नित्यं डिम्बरूपं श्रीकृष्णेच्छासमुद्भवम् ॥
जलेन परिपूर्णञ्च कृष्णस्य मुखविन्दुना ।
सृष्ट्युन्मुखस्यादिसर्गे परिश्रान्तस्य क्रीड़तः ॥
प्रकृत्या सह युक्तेन कलया निजया नृप ! ।
तत्राधारो महद्विष्णोर्विश्वाधारस्य विस्तृतः ॥
प्रकृतीगर्भसंभूतडिम्बोद्भूतस्य भूमिप ! ।
सुविस्तृते जलाधारे शयानश्च महान् विराट् ॥
राधेश्वरस्य कृष्णस्य षोड़शांशः प्रकीर्त्तितः ।
दूर्व्वादलश्यामरूपः सस्मितश्च चतुर्भुजः ।
वनमालाधरः श्रीमान् शोभितः पीतवाससा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
महाविलं, क्लौ, ( महच्च तत् विलञ्चेति । )
आकाशम् । इति जटाधरः ॥ हृच्छिद्रञ्च ॥
महाविषः, पुं, ( महत् अत्युत्कटं विषमस्य । )
द्विमुखसर्पः । यथा,—
"महाविषः कालसर्पो राजाहिर्द्विमुखोरगः ।"
इति जटाधरः ॥